# Shri Shankaracharya Prarthana

# શ્રીશઙ્કુરાચાર્યપ્રાર્થના

## Document Information

Text title : Shri Shankaracharya Prarthana

File name : shankarAchAryaprArthanA.itx

Category : deities_misc, gurudev, shrIdharasvAmI, aShTaka

Location : doc_deities_misc

Author : Shridharasvami

Proofread by : Manish Gavkar

Description/comments : shrIdharasvAmI stotraratnamAlikA

Latest update : February 11, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 12, 2023

*sanskritdocuments.org*

Shri Shankaracharya Prarthana

# શ્રીશઙ્કરાચાર્યપ્રાર્થના

(પૃથ્વીવૃત્તમ્)

પ્રભો ભવભયાર્તિહન્ભવભયાતુરઃ પ્રાર્થયે
ભવપ્રશમનોત્સુકોઽપિ કિમુદાસવચ્ચેષ્ટસે ।
મમાર્તરવ ઈદૃશઃ કિમિતિ ન શ્રુતો વિસ્મયી
નિરૂપયિતુમપ્યહો સ્ફુરતુ સામૃતા વાક્તવ ॥ ૧॥

કલાવહહ માઽદૃશોઽપિ ખલુ માયયા ભ્રામિતઃ
ન વેત્તિ કુશલં સ્વરૂપમમલં પરં બ્રહ્મ યત્ ।
તનોષિ કુશલં પરં ત્વમસિ ભોઃ પરં તદ્ગુણન્
શ્રુતં કિલ ન નિશ્ચિતં હ્યનુભવેન માં બોધય ॥ ૨॥

યદેક ઇહ બોધિતોઽસ્મિ ન ચ ભોઃ પુનસ્તે શ્રમઃ
ભવેયમિહ બોધકો ભુવિ પદાબ્જસેવારતઃ ।
શ્રમોઽપિ તવ વારિતોઽહમપિ મોક્ષભાગ્ભો ગુરો
વિનાશ્રમમનિન્દિતં ભવતિ વિશ્વસઙ્ગોપનમ્ ॥ ૩॥

તવાનુચરિતં પ્રિયં હ્યહમપીહ ભિક્ષુર્ગુરો
તવૈવ ખલુ વાસના હૃદિ મમાપિ જાનાસિ ભોઃ ।
અહં ત્વમિતિ નિશ્ચયો વિતનુતે શ્રુતિસ્તત્ત્વતઃ
સતીત્થમપિ કિન્ન ભો ભવતિ દર્શનં તે વદ ॥ ૪॥

દયાં કુરુ ચ શાધિ માં પ્રણતવત્સલસ્ત્વં ગુરો
તવાવતરણન્દિનં સમવલોક્ય ભોઃ પ્રાર્થયે ।
અહો બત ન ભાષસે કિમિતિ જાડ્યમેતચ્ચિતઃ
કિમર્થમનુશઙ્કસે સકલવિત્પ્રભો બ્રૂહિ તત્ ॥ ૫॥

ભવેન્મદધિકોઽપિ વા ભવતુ કોઽપિ દક્ષો યદિ
તનોતુ કુશલં નૃણાં તદપિ મે ભવેત્તુષ્ટયે ।
વિહાય ખલુ વાસનાં વિતતભૂમ્નિ રંસ્યે પરં

સમાધિમથ નિશ્ચલાં ભજતુ મે મનઃ પ્રાર્થયે ॥ ૬॥

ન મે વિષયવાસના ન ચ તથૈવ કીર્તિસ્પૃહા
ન કર્મસચિવોઽસ્મ્યહં ન ચ વિમૂઢધીર્વા ધને ।
ત્વદીયવિમલં શુભં સુખધનં સ્વરૂપં યશઃ
ગુરો જગતિ વિસ્તૃતં ભવતુ સૈવ મે વાસના ॥ ૭॥

શ્રીમચ્છઙ્કરદેશિકો વિજયતે વેદાન્તતત્ત્વોદધિઃ
ભૂમા બ્રહ્મસનાતનો વિભુરહો નાસ્તિ દ્વિતીયં યતઃ ।
અજ્ઞાનાન્ધવિમૂઢચિત્તજનતા યન્મોચિતાઽનેકશઃ
માયાધ્વાન્તવિનાશનૈકતરણિં વન્દે ગુરું શઙ્કરમ્ ॥ ૮॥

ઇતિ શ્રીમત્ પરમહંસપરિવ્રાજકાચાર્ય સદ્ગુરુ ભગવાન્
શ્રીધરસ્વામીમહારાજવિરચિતા શ્રીશઙ્કરાચાર્યપ્રાર્થના સમ્પૂર્ણા ।

Proofread by Manish Gavkar

---

*Shri Shankaracharya Prarthana*

pdf was typeset on February 12, 2023

Please send corrections to *sanskrit@cheerful.com*